**B.A. 3rd Semester (Honours) Examination, 2019-20**

**SANSKRIT**

**Course ID : 30911** **Course Code : AH/SNS-301C-5**

Course Title: Vedic Literature

**Time: 2 Hours** **Full Marks: 40**

*The figures in the margin indicate full marks.*
*Candidates are required to give their answers in their own words as far as practicable.*

**1.** अधोलिखितेषु प्रश्नेषु *पञ्चप्रश्ना:* लघुतया च समाधेया:। *एकस्य* उत्तरम् अवश्यमेव संस्कृतभाषया देवनागरलिप्या च प्रदेयम्। 2×5=10

(a) विनियोगस्य कति भेदा:? के च ते?

(b) किं नाम सूक्तम्? ऋग्वेदसंहितायां कति सूक्तानि प्राप्यन्ते?

(c) इन्द्र-सूक्तस्य क: ऋषि:? किं च छन्द:?

(d) 'ईळे' इति पदस्य लौकिकं रूपमर्थेन सह लिखत।

(e) हिरण्यगर्भशब्दस्य कोऽर्थ:? अक्षसूक्तं कस्मिन् मण्डले वर्तते?

(f) 'व्यवहिताश्च' इति सूत्रस्य सोदाहरणम् अर्थं लिखत।

(g) 'स जनास: इन्द्र:' इत्यत्र 'जनास:' इति पदं कथं निष्पद्यते? 'गन्तवै' इति रूपं वैदिकसंहितायां कथं जायते?

(h) स्तोत्रं नाम किम्? किं च शस्त्रम्?

**2.** *कस्यचिदेकस्य* भाष्यवचनस्य तात्पर्यं सप्रसङ्गं संस्कृतभाषया देवनागरलिप्या च लेख्यम्। 5×1=5

(a) अभिप्लवषडहस्य मध्यवर्त्तिषूक्थ्येषु तृतीयसवने मैत्रावरुणस्य 'अग्ने यं यज्ञम्' इत्यादिको वैकल्पिकोऽनुरूपस्तृच:।

(b) संसवे निष्केवल्ये निविद्धानीयस्य पुरस्ताद् 'यो जात एव' इति संशेत्।

**3.** अधस्तात् *कस्यचिदेकस्य* मन्त्रस्य ऋषिच्छन्दोदेवताविनियोगनिर्देशपूर्वकं व्याख्यानं संस्कृतभाषया देवनागरलिप्या च कुरुत। 5×1=5

(a) अ॒ग्नि: पूर्वेभिर्ऋषिभि॒-
रीड्यो॒ नूतनैरुत।
स दे॒वाँ एह व॑क्षति।।

(b) अक्षैर्मा दीव्यः कृषिमित् कृषस्व
    वित्ते रमस्व बहु मन्यमानः।
    यत्र गावः कितव तत्र जाया
    तन्मे वि चष्टे सवितायमर्यः।।

**4.** उपर्युक्तयोः [3.(a), (b) इत्यनयोः] मन्त्रयोः *कस्यचिदेकस्य* मन्त्रस्य पदपाठो विधेयः। 5×1=5

**5.** अधोनिर्दिष्टेषु *एकम्* आश्रित्य टीका संस्कृतभाषया देवनागरलिप्या च लेख्या। 5×1=5

वैदिकः उपसर्गः, वैदिकं शब्दरूपम्, वैदिकः लुङ्लकारः।

**6.** अधस्तात् *कस्यचिदेकस्य* प्रश्नस्योत्तरं वैशद्येन संस्कृतभाषया देवनागरलिप्या च विधेयम्। 10×1=10

(a) अग्निदेवस्य माहात्म्यं वेदे यथा वर्णितं तथा वैशद्येन विवृणुत।

(b) हिरण्यगर्भसूक्तं दार्शनिकसूक्तं न वेति विशदतया विचार्य्यताम्।

(c) अक्षनिन्दा कृषिमाहात्म्यं च सूक्तमध्ये यथा दृश्यते सूक्तमाश्रित्य तत्सर्वं विशद्यताम्।